# दीपिका

## षष्ठकक्षायै
## संस्कृत–अभ्यासपुस्तिका

6




SCERT
स्वाध्यायान्मा प्रमदः

राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्
वरुण मार्ग, डिफेन्स कॉलोनी, नई दिल्ली–110024

**ISBN:** 978-93-6291-193-3
©State Council of Educational Research and Training, Delhi.
2025
Copies : 16000

# अभ्यासपुस्तिकानिर्माणसमितिः

## संरक्षकः

**श्री पांडुरंग के पॉलः (आई.ए.एस.)**
प्रमुखः सचिवः (शिक्षा) अध्यक्षः, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ. रीता शर्मा**
निदेशिका, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

## परामर्शदाता

**डॉ. मुकेश यादवः**
सचिवः, राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

## परियोजना समन्वयिका

**डॉ. मनीषा तनेजा**
सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

## विशेषज्ञाः

**प्रो. जतीन्द्र-मोहन-मिश्रा**
आचार्यः, संस्कृतम्, भाषा-शिक्षा-विभागः, राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**प्रो. सुमन-कुमार-झा**
विभागाध्यक्षः साहित्य-विभागः, श्री लाल-बहादुर-शास्त्री-राष्ट्रीय-संस्कृत-विश्वविद्यालयः, दिल्ली–16

**Published by:** State Council of Educational Research and Training, Delhi-110024

**मुद्रकः एजुकेशनल स्टोर्स, ग़ाज़ियाबाद-201009**

**डॉ ज्ञानेन्द्र-कुमार:**
सहायक-आचार्य:, केन्द्रीय-शिक्षा-संस्थानम्, दिल्ली-विश्वविद्यालय:

**डॉ वाचस्पतिनाथझामणि**
सहायक-आचार्य:, संस्कृतम्, भाषा-शिक्षा-विभाग:, राष्ट्रिय-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ आभा झा**
प्रवक्त्री संस्कृतम्, गार्गी सर्वोदय कन्या विद्यालय:, ग्रीन पार्क:, दिल्ली -16

**डॉ. मनीषा तनेजा**
सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

## लेखक मण्डलम्

**डॉ. मनीषा तनेजा-** सहायक-आचार्या (संस्कृतम्), राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**डॉ. आभा झा-** प्रवक्त्री-संस्कृतम्, गार्गी सर्वोदय-कन्या-विद्यालय:, ग्रीन पार्क:, दिल्ली-16

**डॉ. शंकरदत्त: पाण्डेय:-** प्रवक्ता-संस्कृतम्, सर्वोदय-बाल-विद्यालय: नं. 2, मण्डावली

**डॉ. ऋता शर्मा-** प्रवक्त्री-संस्कृतम्, सर्वोदयविद्यालय:, पूर्वी पंजाबी बाग:, दिल्ली

**डॉ. चेतन-वेदिया-** प्र.स्ना.शिक्षक:- संस्कृतम्, मुख्य-शैक्षणिक-इकाई, शिक्षा निदेशालय:, प्राचीन सचिवालय:, दिल्ली

**डॉ. रामगोपाल-फगोडिया-** प्र.स्ना.शिक्षक:- संस्कृतम्, राजकीय-माध्यमिक-बाल-विद्यालय: नं 2 खानपुर, दिल्ली 80

**डॉ. आशुतोष-कुमार:-** प्र.स्ना.शिक्षक:- संस्कृतम्, राजकीय-प्रतिभा-विकास-विद्यालय:, आई.पी.एक्सटेन्शन पटपड़गंज, दिल्ली-92

**श्रीमती रुचि झाँम-** प्र.स्ना.शिक्षका-संस्कृतम्, राजकीयोच्चतर-माध्यमिक-कन्या-विद्यालय:, आज़ादपुर ग्राम:, दिल्ली

## प्रकाशनदलम्

**श्री दिनेश-कुमार-शर्मा,**
ए.एस.ओ., राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

**सुश्री फौज़िया,**
राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषद्, दिल्ली

# पाठानुक्रमणिका


| | | | पृष्ठाङ्का: |
|---|---|---|---|
| | आमुखम् | | vii |
| 1. | प्रथम: पाठ: | वयं वर्णमालां पठाम: | 1 |
| 2. | द्वितीय: पाठ: | संयुक्त-व्यञ्जनानि | 1 |
| 3. | तृतीय: पाठ: | एष: क: ? एषा का ? एतत् किम् ? | 5 |
| 4. | चतुर्थ: पाठ: | अहं च त्वं च | 10 |
| 5. | पञ्चम: पाठ: | अहं प्रात: उत्तिष्ठामि | 14 |
| 6. | षष्ठ: पाठ: | शूरा: वयं धीरा: वयम् | 18 |
| 7. | सप्तम: पाठ: | स: एव महान् चित्रकार: | 22 |
| 8. | अष्टम: पाठ: | अतिथिदेवो भव | 25 |
| 9. | नवम: पाठ: | बुद्धि: सर्वार्थसाधिका | 30 |
| 10. | दशम: पाठ: | यो जानाति स: पण्डित: | 33 |
| 11. | एकादश: पाठ: | त्वम् आपणं गच्छ | 36 |
| 12. | द्वादश: पाठ: | पृथिव्यां त्रीणि रत्नानि | 39 |
| 13. | त्रयोदश: पाठ: | आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु: | 42 |
| 14. | चतुर्दश: पाठ: | सङ्ख्यागणना ननु सरला | 46 |
| 15. | पञ्चदश: पाठ: | माधवस्य प्रियम् अङ्गम् | 49 |
| 16. | षोडश: पाठ: | वृक्षा: सत्पुरुषा: इव | 52 |

# आमुखम्

कस्यामपि भाषायां दक्षताप्राप्तिः एका सहजा प्रक्रिया भवति या शिक्षणक्रमे महत्त्वपूर्णं स्थानं भजते । भाषायां दक्षताप्राप्त्यनन्तरं मनुष्यः स्वमनोभावान् कस्यापि समक्षं प्रस्तोतुं शक्नोति । भाषा माध्यमस्य कार्यं करोति येन मनुष्यः स्वावश्यकतानां, स्वविचाराणां, स्वमनोभावानां च संप्रेषणं करोति । भाषाभावे सर्वाणि कार्याणि न संभवानि, अतः मानवजीवने भाषायां दक्षताप्राप्तिः अत्यन्तं महत्त्वपूर्णाऽस्ति।

**भाषिकदक्षतायाः** अर्थः भवति- छात्रः कामपि भाषां वक्तुम्, अवगन्तुं, लेखितुं, पठितुं च प्रवीणतां प्राप्नोतु । तेषाम् अभिव्यक्तिशक्तेः विकासः एव भाषिकदक्षता कथ्यते ।

शिक्षा एका उद्देश्यपूर्णा प्रक्रिया अस्ति । एतानि शैक्षिकोद्देश्यानि शिक्षार्थिनां शैक्षिकसम्प्राप्त्याः वाञ्छ नीयतायाः गुणवत्तायाः च निर्धारणं कुर्वन्ति । एतेषाम् उद्देश्यानां प्राप्त्यर्थं छात्राणां योग्यतानां गुणानां च मापनाय विभिन्नप्रकाराणां परीक्षणानां प्रशासनं क्रियते।

परीक्षणे दक्षतानिर्धारणस्य तात्पर्यमस्ति यत् अस्यां प्रक्रियायां पाठ्यवस्तूनां, पाठ्यविषयाणां, पाठ्यविधीनां च विकसितैः कौशलैः सह सम्बन्धः अस्ति । अनेन शिक्षया सह छात्रजीवनस्य सम्यक् समायोजनाय छात्रेभ्यः उन्नतकौशलं प्रदीयते । दक्षताधारितप्रश्नाः परिवर्तितसमयस्य आवश्यकताः सञ्जाताः सन्ति । पाठ्यक्रमे दक्षताधारितप्रश्नाः छात्रान् सक्रियान् कुर्वन्ति । प्रत्यक्षप्रश्नाः पाठस्योपरि आधारिताः भवितुं शक्नुवन्ति परञ्च दक्षताधारितप्रश्नाः छात्रान् न केवलं चिन्तनस्य अवसरं प्रददति अपि च दैनिकजीवने ज्ञानस्य प्रयोगं कथं कर्तुं शक्नुवन्ति इत्यस्य मार्गम् अपि दर्शयन्ति

राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषदा षष्ठकक्षायाः कृते नवीनपाठ्यपुस्तकं 'दीपकम्' इत्यस्य रचना अभवत्। 'दीपकम्' नाम पाठ्यपुस्तकं नूतनां राष्ट्रियशिक्षानीतिं क्रियारूपतां नेतुं निर्मितम् । इदं पाठ्यपुस्तकं शिक्षार्थिनः सरलरूपेण अवगन्तुं शक्नुयुः इति मनसि निधाय राज्यशैक्षिकानुसंधानप्रशिक्षणपरिषदा दीपिकायाः निर्माणम् कृतम् । 'दीपिका' 'दीपकम्' इत्यस्य पाठ्यपुस्तकस्य दक्षताधारितप्रश्नानाम् अभ्यासपुस्तिका अस्ति । एतस्याम् उत्तरपुस्तिकायां निम्नलिखितप्रकारकाः दक्षताधारिताः प्रश्नाः सन्ति-

1) **अभिज्ञान-प्रश्नाः-** अभिज्ञानेन अभिप्रायः स्मृत्या भवति । छात्रस्य ज्ञानचिन्तनसमस्यासमाधानयोग्यताभिः सम्बद्धाः प्रश्नाः सन्ति अत्र । अपि च परिभाषीकरणं, चयनं, मापनं, मेलनं, प्रतिस्मरणं, प्रत्यभिज्ञानं लेखनाधारितप्रश्नाः अभिज्ञानात्मकप्रश्नाः सम्मिलिताः सन्ति ।

**यथा–** ‘उ’ वर्णः स्वरः अस्ति । आम्

(i) कवर्गे पञ्च वर्णाः भवन्ति । ________

(ii) ‘ए’ संयुक्तवर्णः अस्ति । ________

2) **अवबोधन-प्रश्नाः** अवबोधनस्य अभिप्रायः बोधप्रक्रिया अस्ति। अवबोधात्मकप्रश्नाः छात्राणां विभिन्नस्तरानुसारं सूचनानां ज्ञानेन सह पुनःस्मरणस्य प्रत्यभिज्ञानस्य च बोधं निर्धारयन्ति । एतेषु प्रश्नेषु विभिन्नतथ्यानां व्याख्या अपि सम्मिलिता भवति ।

**यथा -**

(i) वृक्षाः स्वार्थाय फलानि यच्छन्ति। ☐

(ii) इदं शरीरं परोपकाराय अस्ति। ☐

**विचारात्मक-प्रश्नाः स्वभाषया उत्तराणि लिखन्तु-**

(i) अस्माकं राष्ट्रं लोकतान्त्रिकम् अस्ति राजतान्त्रिकं वा कथम् ? इति लिखन्तु ?

3) **तुलना-** तुलनायाः अभिप्रायः उपमया भवति । ज्ञानात्मकपक्षे विश्लेषणमध्ये तुलना संभवा । सम्बन्धितप्रश्नेषु गुणाधारेण तुलना क्रियते।

**विलोमपदानि मेलयन्तु-**

| | |
|---|---|
| ददातु | आनय |
| गच्छतु | हानिकरम् |
| नय | विलम्बेन |
| लाभकरम् | स्वीकरोतु |
| शीघ्रतया | आगच्छतु |

4) **सम्बन्धबोधक-प्रश्नाः -** सम्बन्धज्ञानेन अभिप्रायः ज्ञानयोर्मध्ये सम्बन्धेन भवति । ज्ञानात्मकपक्षे संश्लेषणमध्ये सम्बन्धज्ञानं सम्भवम् । सम्बन्धितप्रश्नाः सम्बन्धाधारिताः भवन्ति ।

**पट्टिकातः पदानि चित्वा वाक्यपूर्तिं कुर्वन्तु-**

(i) श्रीरामस्य गुरुः ________________ आसीत् ।

(ii) अर्जुनस्य गुरुः ______________ आसीत् ।

(iii) चन्द्रगुप्तस्य गुरुः ______________ आसीत् ।

(iv) कर्णस्य गुरुः ______________ आसीत् ।

| **पट्टिका** | द्रोणाचार्यः परशुरामः वशिष्ठः चाणक्यः |
|---|---|

## स्वकीयजीवने परोपकाराय कृतानां कार्याणां सूचीनिर्माणं कुर्वन्तु-

5) **अन्वेषणम्-** अन्वेषणेन अभिप्रायः अनुसंधानं भवति यत्र तथ्येषु समाहितसत्यस्य उद्घाटनं क्रियते । ज्ञानात्मकपक्षे प्रयोगमध्ये भावात्मकपक्षे संगठनमध्ये च अन्वेषणं सम्भवम् । सम्बन्धितप्रश्नाः अन्वेषणाधारिताः भवन्ति।

## निर्देशानुसारम् उत्तरत-

(i) 'मातुः पितुः च चरणवन्दनं करोमि ।' अत्र अव्ययपदं किम् ?

## वर्णानुसारेणम् खगान् मेलयन्तु-

| **वर्णाः** | **खगाः** |
|---|---|
| शुकः | नीलः |
| बकः | हरितः |
| श्वेतः | काकः |
| मयूरः | कृष्णः |

6) **व्याकरणप्रयोगः-** व्याकरणस्य प्रयोगे दक्षता अत्र अभिप्रायः अस्ति । ज्ञानात्मकपक्षे प्रयोगमध्ये व्याकरणप्रयोगः सम्भवः । सम्बन्धितप्रश्नाः व्याकरणस्य प्रयोगमुपरि आधारिताः सन्ति ।

## निर्देशानुसारम् उत्तराणि लिखन्तु-

(i) 'धनकामना सुखवासना न च वञ्चना हृदये' अत्र किं कानि अव्ययपदानि सन्ति ?

(ii) ______, ______, वयम् - रिक्तस्थानेषु शब्दरूपाणि पूरयन्तु ?

7) **व्यवहारकुशलता -** व्यवहारकुशलता भाषाधिगमे अनिवार्याऽस्ति । दैनिकजीवने भाषायाः सम्यक् प्रयोगः व्यवहारकुशलतामुपरि आश्रितः । व्यवहारकुशलता ज्ञानात्मकपक्षस्य प्रायोगिकं रुपमस्ति । सम्बन्धितप्रश्नाः व्यवहारकुशलतायाः उपरि आधारिताः भवन्ति ।

**प्रदत्तकार्येषु भवन्तः यानि कार्याणि स्वराष्ट्रस्य कृते कुर्वन्ति तस्य समक्षे – "आम्", यानि न कुर्वन्ति तस्य समक्षे "न" लिखन्तु-**

**आम्/न**

(i) राष्ट्रगान-समये सावधान-अवस्थायां भवन्ति । ____________

(ii) राष्ट्रध्वजस्य सम्मानं कुर्वन्ति । ____________

(iii) यातायात- नियमानां पालनं कुर्वन्ति । ____________

(iv) इतस्ततः कर्गदं न क्षिपन्ति । ____________

8) **तार्किकयोग्यता-** तार्किकयोग्यतायाः अभिप्रायः तर्कयुक्तज्ञानं भवति। ज्ञानात्मकपक्षे प्रयोगमध्ये तार्किकयोग्यतायाः स्थानं सुनिश्चितम् । सम्बन्धितप्रश्नाः तार्किकयोग्यतायाः उपरि आधारिताः भवन्ति ।

i) अधिकं चाकलेहस्य खादनं स्वास्थ्याय हानिकरं भवति न वा ? चर्चां कृत्वा स्वमतं तर्कसहितं लिखन्तु-

ii) भवतां जीवने के जनाः सन्ति, ये भवतां दैनिकजीवने सहायतां कुर्वन्ति ? विचार्य लिखन्तु|

9) **भाषाविस्तरः** अपि ज्ञानात्मकपक्षे प्रयोगमध्ये आगच्छति । सम्बन्धितप्रश्नाः भाषाविस्तरस्य उपरि आधारिताः भवन्ति।

**"स्वपरिचयः" इति विषयम् आधृत्य रिक्तस्थानानि पूरयन्तु-**

(क) मम नाम .............................. अस्ति । (स्वनाम लिखतु)

(ख) अहं .................................... अस्मि । (छात्रः/छात्रा)

(ग) मम कक्षा ............................ अस्ति । (सप्तमी/षष्ठी)

अतः दक्षताधारिता प्रश्नाः उपर्युक्त वर्णनानुसारम् अभ्यसनीयाः ।

एतानि कानिचन निदर्शनानि सन्ति यानि अभ्यासीकृत्य शिक्षार्थिनः न केवलं संस्कृतभाषायाः कथां कवितां गीतादीनि च पठितुं शक्नुवन्ति,अपितु पाठाधारितानां प्रश्नानाम् उत्तराणि वक्तुं लेखितुं चापि शक्नुवन्ति । प्रश्नानां विविधता शिक्षार्थिनः चिन्तनाय प्रेरयति । चिन्तनेन च बुद्धेः निर्णयसामर्थ्यम् अभिवर्धते ।

एषा दीपिका शिक्षार्थिनां मनसः अज्ञानान्धकारम् अपाकरोतु,तेषाम् सम्भाषणकौशलं वर्धताम्, संस्कृतपुस्तकपठने रुचिं शिक्षताय/जागर्त्त, लब्धस्य ज्ञानस्य प्रयोगं शिक्षयतु इति राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदः लक्ष्यम् । सर्वे शिक्षकाः पुस्तिकायाः अस्याः उपयोगं कुर्वन्तु लाभान्विताश्च भवन्तु इति आशासे ।

धन्यवादाः ।

**डॉ मनीषा तनेजा**
सहायक-आचार्या (संस्कृत)
राज्य-शैक्षिक-अनुसंधान एवं प्रशिक्षण-परिषद् , दिल्ली

# प्रथमः पाठः- वयं वर्णमालां पठामः
# द्वितीयः पाठः संयुक्त-व्यञ्जनानि

**1. स्वपरिवारस्य पञ्चसदस्यानां सम्बन्धिनां वा नामानि लिखित्वा उदाहरणानुसारं व्यञ्जनवर्णान् पृथक्कुर्वन्तु ।** (अवबोधः)

यथा – रमेशः = र् , म् , श्

नाम व्यञ्जनवर्णानि

1 .............. = ..........................................................................
2 .............. = ..........................................................................
3 .............. = ..........................................................................
4 .............. = ..........................................................................
5 .............. = ..........................................................................

**2. पञ्चानां स्वमित्राणां नामानि लिखित्वा उदाहरणानुसारं स्वरवर्णान् पृथक्कुर्वन्तु ।** (अवबोधः)

यथा – बालिका = आ , इ , आ

नाम स्वरवर्णानि

1 .............. = ..........................................................................
2 .............. = ..........................................................................
3 .............. = ..........................................................................
4 .............. = ..........................................................................
5 .............. = ..........................................................................

**3. अधोलिखितप्रश्नानाम् उत्तराणि 'आम्' अथवा 'न' इति पदेन लिखन्तु ।** (अभिज्ञानम्)

**यथा–** 'उ' वर्णः स्वरः अस्ति । आम्

(i) कवर्गे पञ्च वर्णाः भवन्ति । ________

(ii) 'ए' संयुक्तवर्णः अस्ति । ________

(iii) व्यञ्जनवर्णानाम् उच्चारणं स्वरस्य साहाय्येन भवति । ______

(iv) सन्ध्यक्षराणि ह्रस्वाणि भवन्ति । ______

(v) 'ह्' अन्तस्थः वर्णः अस्ति । ______

**4. छात्राः! अधः केचन शब्दाः लिखिताः सन्ति । तेभ्यः संयुक्तव्यञ्जनानि अभिज्ञाय समुचिते स्थाने लिखन्तु । (अवबोधनं, तुलना भाषाविस्तरः च)**

**यथा-** **वृक्षः** **<u>क्ष</u>**

| | | | | | |
|---|---|---|---|---|---|
| (i) | जिज्ञासा | ______ | (ii) | विद्युत् | ______ |
| (iii) | परीक्षा | ______ | (iv) | त्रिनेत्रम् | ______ |
| (v) | कृतज्ञः | ______ | (vi) | अनभिज्ञः | ______ |
| (vii) | क्षमा | ______ | (viii) | विज्ञानम् | ______ |
| (ix) | विद्यालयः | ______ | (x) | अक्षयम् | ______ |

**5. चित्रं दृष्ट्वा समुचितैः वर्णैः रिक्तस्थानानि पूरयित्वा सार्थकं पदं निर्मान्तु । (अभिज्ञानम्, अवबोधनं भाषाविस्तरः च)**

**यथा- <u>अ</u> + <u>श्</u> + <u>व्</u> + <u>अः</u>**




(i) प् + उ + ___ + ___ + अ + ___ + अ + म्



(ii) न् + ___ + त् + र् + अ + म्



(iii) ल् + ए + ख् + अ + ___ + ई



(iv) प् + उ + ___ + प् + अ + म्



(v) व् + अ + स् + त् + ___ + अ + म्



(vi) द् + ___ + प् + अ + क् + अ + म्



6. उदाहरणानुसारम् अधोलिखित-वर्णात् पूर्ववर्तिनं परवर्तिनं च वर्णं लिखन्तु । (अवबोधनम्)

यथा- क ख ग

(i) ____ ज ____ (ii) ____ ढ ____

(iii) ____ ई ____ (iv) ____ ऐ ____

(v) ____ ल ____ (vi) ____ स ____

(vii) ____ फ ____

7. चित्रस्य साहाय्येन पट्टिकात: समुचितं पदं लिखित्वा वर्णवियोजनं कुर्वन्तु । (अभिज्ञानम् , अवबोधनं सम्बन्धज्ञानं च)

| | |
|---|---|
| **यथा- बालिका = ब्+आ+ल्+इ+क्+आ** |  |
| i. कुक्कुर: = ___ + ___ + ___ + ___ + ___ + ___ + ___ |  |
| ii. उपनेत्रम् = ___ + ___ + ___ + ___ + ___ + ___ + ___ + ___ |  |
| iii. क्रीडक: = ___ + ___ + ___ + ___ + ___ + ___ + ___ |  |
| iv. अध्यापक: = ___ + ___ + ___ + ___ + ___ + ___ + ___ |  |
| v. पुस्तकम् = ___ + ___ + ___ + ___ + ___ + ___ + ___ + ___ |  |
| vi. आसन्द: = ___ + ___ + ___ + ___ + ___ + ___ |  |

8. अधोलिखित वर्णानां समक्षे पट्टिकात: चित्वा उच्चरणस्थानानि लिखन्तु ।
(तार्किकयोग्यता अवबोधनम् च तार्क़िक योग्यता अवबोधनं च)

(i) च – ________ (ii) प – ________
(iii) ल – ________ (iv) ग – ________
(v) ष – ________

| पट्टिका | दन्त्य:, कण्ठय:, तालव्य:, मूर्धन्य:, ओष्ठय: |
|---|---|

## इदमपि ज्ञातव्यम्
### संस्कृते फलानां नामानि

| संस्कृतम् | हिन्दी | संस्कृतम् | हिन्दी |
|---|---|---|---|
| आम्रम्, रसाल: | आम | नारिकेलफलम् | नारियल |
| दाडिमम् | अनार | सेवफलम् | सेव |
| द्राक्षाफलम् | अंगूर | खर्जूरम् | खजूर |
| कदलीफलम् | केला | चीकूफलम् | चीकू |
| जम्बूफलम् | जामुन | दृढबीजम्, बीजपूरम् | अमरूद |

## तृतीय: पाठ:

# एष: क: ? एषा का ? एतत् किम् ?

**1. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु । (भाषा विस्तर:)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा - | बालिका | बालिके | बालिका: |
| (क) | अजा | ------ | ------ |
| (ख) | ------ | कन्ये | ------ |
| (ग) | ------ | ------ | शिक्षिका: |
| (घ) | ------ | गायिके | ------ |
| (ङ) | महिला | ------ | ------ |

**2. उदाहणानुसारं पदानां वचनपरिवर्तनं कुर्वन्तु। (भाषाविस्तर:)**

| | | |
|---|---|---|
| यथा- | एष: बालक: पठति । | एते बालका: पठन्ति। |
| (क) | स: शिक्षक: गच्छति । | -------------------- |
| (ख) | एषा बालिका क्रीडति । | -------------------- |
| (ग) | एतत् पत्रं पतति । | -------------------- |
| (ग) | सा अजा चरति । | -------------------- |
| (ङ) | तत् पुष्पं विकसति । | -------------------- |

**3. पाठ्यपुस्तकानुसारं प्रदत्तकथनानां समक्षं आम्/न इति लिखन्तु । (अभिज्ञानम्)**

| | कथनानि | (आम्/न) |
|---|---|---|
| (i) | चन्द्रयानं विमानम् अस्ति। | ________ |
| (ii) | बालिके भ्रमत: । | ________ |
| (iii) | मयूरौ नृत्यत: । | ________ |
| (iv) | अजा: गायन्ति । | ________ |
| (v) | शिक्षक: भ्रमति । | ________ |

**4. प्रदत्तपदेषु बहुवचनान्तपदान् उदाहरणानुसारं वृत्ताकारं कुर्वन्तु । (चयनम्)**

| | | | | | |
|---|---|---|---|---|---|
| वृक्षौ, | बालिकाः, | गजः, | वैद्याः, | पत्राणि, | चक्रम् , |
| मयूराः, | पुस्तके, | अजाः, | शिक्षिका, | बालकौ, | फलानि, |
| कुक्कुराः, | पुष्पम् , | गायिका, | सैनिकाः, | विद्यालयः | |

**5. चित्रं दृष्ट्वा वाक्यानि रचयन्तु। (भाषाविस्तरः)**

**यथा-** सा बालिका किं करोति ?

सा बालिका हसति।



1. ते बालिके किं कुरुतः ?

_______________________।



2. सः बालकः किं करोति ?

_______________________।




3. सा बालिका किं करोति ?

_______________________।



4. ते छात्राः किं कुर्वन्ति ?

_______________________।



| पट्टिका | नृत्यति, गायतः, लिखन्ति, धावति |
|---|---|

6. चित्रं दृष्ट्वा रिक्तस्थानेषु सः/एषः, सा/एषा, तत्/एतत् इति विचार्य लिखन्तु ।
(अभिज्ञानं तुलना च)

**यथा-**

समीपम् दूरम्

एषः सैनिकः । 

सा अजा । 

(i) ——— (एषः/सः) गजः । 

(ii) ——— (एषा/सा) कन्या । 

(iii) ——— कुक्कुरः । (एषः/सः) 

(iv) ——— सङ्गणकम् । (एतत्/तत्) 





(v) ——— पुस्तकम् । (तत्/एतत्) 


(vi) ——— अजा । (एषा/सा) 

(vii) ——— शिक्षकः । (सः/एषः) 


**7.** अधोलिखितपदेषु उदाहरणानुसारं वचनपरिवर्तनं कुर्वन्तु । (अवबोधनम् भाषाविस्तरः च)

**यथा-**


| | | |
|---|---|---|
|  |  |  |
| एषः अश्वः | एतौ अश्वौ | एते अश्वाः |
|  |  |  |
| एषा अजा | एते अजे | एताः अजाः |
|  |  |  |
| एतत् पुस्तकम् | एते पुस्तके | एतानि पुस्तकानि |
|  |  |  |
| एषः चालकः | ____________ | ____________ |
|  |  |  |
| ________ | एतौ चिकित्सकौ | ____________ |
|  |  |  |
| एषा शिक्षिका | ____________ | ____________ |



________



एते व्यजने



________________



________



________________



एतानि पुष्पाणि

8. कक्षायाः निरीक्षणं कृत्वा दश (१०) वस्तुनामानि लिङ्गविभागेन लिखन्तु ।
(तार्किकयोग्यता लेखनं च)

पुल्लिङ्म् - ________________________________
________________________________

स्त्रीलिङ्म्- ________________________________
________________________________

नपुंसकलिङ्म् ________________________________
________________________________

## इदमपि ज्ञातव्यम्

### पुष्पाणां नामानि •

| संस्कृतम् | हिन्दी | संस्कृतम् | हिन्दी |
|---|---|---|---|
| पाटलम् | गुलाब | नागकेसरः | चम्पा |
| कमलम् | कमलम् | गन्धपुष्पम् | गेंदा |
| कर्णिकारः | कनेर | | |

चतुर्थः पाठः

# अहं च त्वं च

**1. अधोप्रदत्तवाक्येषु उदाहरणानुसारं कर्तृपदानुसारं क्रियायां वृत्तं कुर्वन्तु। (अवबोधनं भाषाविस्तरः च)**

| | | | | | |
|---|---|---|---|---|---|
| **यथा -** | **अहं छात्रः** | **-** | **अस्मि** | **स्वः** | **स्थः** |
| (क) | त्वम् अध्यापकः | - | स्थः | असि | स्मः |
| (ख) | युवां महिले | - | स्थः | स्वः | स्मः |
| (ग) | वयं स्त्रियः | - | स्वः | स्मः | स्थः |
| (घ) | यूयं नराः | - | असि | स्थः | स्थ |
| (ङ) | आवां नायिके | - | स्मः | स्वः | अस्मि |

**2. निर्देशानुसारं वचनं परिवर्त्य वाक्यानि लिखन्तु। (व्याकरणप्रयोगः सम्बन्धज्ञानं च)**

| | | |
|---|---|---|
| **यथा -** | **त्वं बालकः असि।** | **(द्विवचने) - युवां बालकौ स्थः।** |
| (क) | अहं शिक्षिका अस्मि। | (बहुवचने) ________ शिक्षिकाः स्मः। |
| (ख) | युवां सौचिकौ स्थः। | (एकवचने) त्वं सौचिकः ________। |
| (ग) | आवां छात्रौ स्वः। | (बहुवचने) ________ छात्राः स्मः। |
| (घ) | यूयं महिलाः स्थ। | (द्विवचने) युवां महिले ________। |

**3. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु। (व्याकरणप्रयोगः सम्बन्धज्ञानं च)**

| | | |
|---|---|---|
| (क) | अहं कन्या अस्मि। | (अहं/वयं) |
| (ख) | ________ कुत्र स्थ ? | (यूयं/युवां) |
| (ग) | ________ क्रीडकः असि। | (त्वं /यूयं) |
| (घ) | ________ शिक्षकौ स्वः। | (आवां/युवां) |
| (ङ) | ________ विद्यालये स्मः। | (वयं/त्वं) |

4. पदानि संयोज्य सार्थकवाक्यानि रचयन्तु । (भाषाविस्तरः व्याकरण प्रयोगः च)

| | | |
|---|---|---|
| अहम् | क्रीडकाः | अस्मि |
| वयम् | बालः | स्मः |
| युवाम् | अम्बा | असि |
| त्वम् | लेखकौ | स्थः |

यथा - अहं बालः अस्मि ।

(क) ________________________________ ।

(ख) ________________________________ ।

(ग) ________________________________ ।

(घ) ________________________________ ।

5. भिन्नप्रकृतिपदं चित्वा लिखन्तु । (अवबोधनम् अन्वेषणं च)

(क) अहम्, वयम्, त्वम्, आवाम्

(ख) अस्मि, सन्ति, स्वः, स्मः

(ग) युवाम्, यूयम्, त्वम्, अहम्

(घ) असि, स्मः, स्थः, स्थ

यथा - त्वम् .......................... .......................... ..........................

6. अधोलिखिते संवादे पट्टिकातः पदानि चित्वा रिक्त-स्थानानि पूरयन्तु ।
(भाषाविस्तरः व्याकरणप्रयोगः च)

| पट्टिका | आवाम्, तव, मम, त्वं, अस्मि |
|---|---|

आनन्दः - मम नाम आनन्दः । ........................ नाम किम् ?

राघवः - .................. नाम राघवः । ........................ कः असि ?

आनन्दः - अहं शिक्षकः ........................... । त्वं कः ?

राघवः - अहमपि शिक्षकः अस्मि ।

आनन्दः - शोभनम् ! ........................... शिक्षकौ स्वः ।

7. अधोलिखितानि रेखाङ्कितपदानि परिवर्त्य वाक्यानि शुद्धानि कुर्वन्तु ।
(व्याकरणप्रयोग: अवबोधनं च)

**यथा -** त्वं गच्छथः । युवां गच्छथः।

(क) अहं पठामः। ................ पठामः।

(ख) वयं नमामि। ................ नमामि।

(ग) यूयं हसथः। ................ हसथः।

(घ) वयं धाववः। ................ धाववः।

8. अधोलिखितानि पदानि लिङ्गानुसारेण पृथक् कृत्वा लिखन्तु ।
(अन्वषेणं सम्बन्धज्ञानं च)

| पट्टिका | भक्तौ, आचार्यः, कोकिले, चटकाः, वृद्धाः, युवकः, नायिकाः, भगिन्यौ, जननी, धावकौ |
|---|---|

| | **पुल्लिङ्गम्** | **स्त्रीलिङ्गम्** |
|---|---|---|
| यथा | आचार्यः | कोकिले |
| | ............................ | ............................ |
| | ............................ | ............................ |
| | ............................ | ............................ |
| | ............................ | ............................ |
| | ............................ | ............................ |

9. त्वं विद्यालये किं किं करोषि ? अधोलिखितधातूनां प्रयोगं कृत्वा रिक्तस्थानेषु लिखतु ।
(भाषाविस्तरः)

..............................

..............................

..............................




..............................

**यथा - अहं पठामि।**

..............................

| पट्टिका | लिख्, क्रीड्, नम्, वद्, खाद् |
|---|---|

## 10. उदाहरणानुसारं पदानि परिवर्त्य लिखन्तु । (सम्बन्धज्ञानं व्याकरणप्रयोगः च)

**यथा -** अहं शिक्षकः अस्मि । — **शिक्षिका असि ।**

(क) वयं सैनिकाः स्मः । — यूयं ...................... स्थ ।

(ख) आवां .................. स्वः । — युवां गायिके स्थः ।

(ग) अहं छात्रः अस्मि । — त्वं ........................ असि ।



## 11. ''स्वपरिचयः'' इति विषयम् आधृत्य रिक्तस्थानानि पूरयन्तु । (अभिज्ञानं, भाषाविस्तरः च)

(क) मम नाम ............................. अस्ति । (स्वनाम लिखतु)

(ख) अहं .................................. अस्मि । (छात्रः/छात्रा)

(ग) मम कक्षा ........................... अस्ति । (सप्तमी/षष्ठी)

(घ) मम मातुः नाम ..................... अस्ति । (मातुः नाम)

(ङ) मम पितुः नाम ..................... अस्ति । (पितुः नाम)

### इदमपि ज्ञातव्यम्

### खाद्यपदार्थानां नामानि

| संस्कृतम् | हिन्दी | संस्कृतम् | हिन्दी |
|---|---|---|---|
| सन्धितम् | अचार | शष्कुली | पूरी |
| आम्रचूर्णम् | अमचूर | पायसम् | खीर |
| अमृती | इमरती | गजकः | गजक |
| पिष्टिका | कचौडी | पोलिका | चपाती |
| मधुरपिष्टकम् | केक | चायम् | चाय |



## पञ्चमः पाठः

# अहं प्रातः उत्तिष्ठामि

**1. पट्टिकातः चित्वा घटिकायाः अधः समुचितं समयं रिक्तस्थानेषु लिखन्तु।** (अवबोधः)



त्रिवादनम् ................................ ................................



................................ ................................ ................................

| पट्टिका | सार्द्ध-एकादशवादनम्, दशवादनम्, सपादत्रिवादनम्, पादोननववादनम्, सार्द्ध-चतुर्वादनम्, त्रिवादनम् |
|---|---|

**2. पट्टिकातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु।** (चयनम्)

(क) शरीरे ........................... मुखं भवति।

(ख) शरीरे ........................... नेत्रे भवतः।

(ग) ........................... रसाः भवन्ति।

(घ) हस्ते ........................... अङ्गुल्यःभवन्ति।

(ङ) एकस्मिन् सप्ताहे ........................... दिवसाः भवन्ति।

(च) एकस्मिन् वर्षे ........................... मासाः भवन्ति।

(छ) वेदाः ........................... सन्ति।

(ज) .......................... लोकाः सन्ति।

(झ) .......................... ग्रहाः सन्ति।

(ञ) दिशः .......................... सन्ति।

| | |
|---|---|
| **पट्टिका** | एकम्, द्वे, त्रयः, चत्वारः, पञ्च, षड्, सप्त, नव, दश, द्वादश |

**3. निर्देशानुसारम् उत्तरत ।** **(चयनम्)**

(i) 'मातुः पितुः च चरणवन्दनं करोमि ।' अत्र अव्ययपदं किम् ? ________

(ii) अहं ________ प्रातराशं करोमि । (सप्तवादने / द्वादशवादने)

(iii) सूर्यः ________ उदेति । (प्रातःकाले /सायंकाले)

**4. स्वदिनचर्या-विषये पट्टिकातः पदानि चित्वा एकं लघु-अनुच्छेदं पूरयन्तु।**
**(चयनम्, भाषाविस्तरःच)**

अहम् (i) ________ वादने उत्तिष्ठामि । प्रथमं करदर्शनं कृत्वा भूमेः वन्दनं करोमि । ततः मातापितरौ नमामि । (ii) ________ वादने शौचं कृत्वा दन्तधावनं मुखप्रक्षालनं च करोमि । अहं (iii) ________ वादने उद्यानं गत्वा भ्रमणं व्यायामं च करोमि । ततः आगत्य (iv) ________ वादने स्नानं कृत्वा प्रार्थनां करोमि । प्रातराशं कृत्वा (v) अहं ________ वादने विद्यालयं गत्वा अध्ययनं करोमि । ततः (vi) ________ वादने गृहम् आगच्छामि । अहं (vii) ________ मध्याह्न-भोजनं करोमि । ततः विश्रामं कृत्वा सायंकाले (viii) ________ मित्रैः सह क्रीडामि, गृहं च आगत्य गृहकार्ये मातुः साहाय्यं करोमि । (ix) ________ वादने रात्रौ विद्यालयस्य कार्यं कृत्वा स्वाध्यायं करोमि । ततः परिवारेण सह भोजनं कृत्वा (x) ________ वादने शयनं करोमि ।

| | |
|---|---|
| **पट्टिका** | पञ्च, सपादपञ्च, सार्धपञ्चवादने, सार्धषड्, सप्त, सार्धद्विवादने, त्रिवादने, सार्धचतुर्वादने, अष्ट, दश |

**5. विचारात्मकाः प्रश्नाः ।** **(तार्किकचिन्तनम्)**



(i) घटिकायां कति अङ्का: भवन्ति ?

**उत्तरम्-** ______________________

(ii) एकस्यां होरायां कति निमेषा: भवन्ति ?

**उत्तरम्-** ______________________

(iii) एकस्मिन् दिवसे कति प्रहरा: भवन्ति ?

**उत्तरम्-** ______________________

**6. दैनिक-कार्याणि समयेन सह मेलयत । (सम्बन्धज्ञानम्)**

| | (क) | | (ख) |
|---|---|---|---|
| (i) | प्रातः जागरणम् | (क) | दशवादने (रात्रौ) |
| (ii) | व्यायाम: | (ख) | सप्तवादने (सायंकाले) |
| (iii) | स्वाध्याय: | (ग) | पञ्चवादने |
| (iv) | रात्रि-शयनम् | (घ) | सार्धपञ्चवादने |

**7. पट्टिकात: समयसूचकशब्दान् विचित्य रिक्तस्थानानि पूरयन्तु । (भाषाविस्तर:, तार्किकचिन्तनम् )**

(क) सूर्य: .............................................. उदेति।

(ख) सूर्यस्य आतप: .............................................. अधिक:भवति।

(ग) सूर्य: .............................................. अस्तं गच्छति।

(घ) .............................................. सूर्य: न दृश्यते।

(ङ) ऋषि: .............................................. उत्तिष्ठति।

| पट्टिका | रात्रौ, सायङ्काले, मध्याह्ने, प्रात: काले, ब्राह्ममुहूर्ते |
|---|---|

## इदमपि ज्ञातव्यम्

### पर्वतीयानां नामानि

| संस्कृतम् | हिन्दी | संस्कृतम् | हिन्दी |
|---|---|---|---|
| परिखा (स्त्री.), खातम् (नपुं.) | खाई | झरः/निर्झरः/वारिप्रवाहः (पुं.) | झरना |
| गुहा (स्त्री.)/कन्दरः (पु.)/दरी (स्त्री.) | गुफा | प्रपातः/अतटः (पुं.) | ढालुआ चट्टान |
| हिमसरित् (स्त्री.) | ग्लेशियर | अधित्यका (स्त्री.) | पठार |
| अद्रिद्रोणी (स्त्री.) | घाटी | प्रस्तरः/ग्रावा/पाषाणः (पुं.), शिला (स्त्री.) | पत्थर |
| शिला (स्त्री.)/शिलाखण्डः (पुं.) | चट्टान | पर्वतः/अद्रिः/शैलः, गिरिः, भूधरः (पुं.) | पर्वत |
| शृङ्गम्/शिखरम् (नपुं.) | चोटी | उपत्यका (स्त्री.), कटकः (पुं.) | पर्वत की तलहटी |

षष्ठः पाठः

# शूराः वयं धीराः वयम्

1 अधः प्रदत्तानां महापुरुषाणां चित्राणां समक्षं तेषां नामानि पट्टिकातः चित्वा लिखन्तु । (अभिज्ञानम्)

i  ________________

ii  ________________

iii  ________________


iv  ________________

v  ________________

________________

| पट्टिका | स्वामी दयानन्दः सरस्वती, आदिगुरुः शंकराचार्यः, महर्षिः वाल्मीकिः, महात्मा गौतमबुद्धः, स्वामी विवेकानन्दः |
|---|---|

2. स्वतन्त्रतासेनानिनां चित्राणि तेषां नामभिः सह मेलयन्तु । (अभिज्ञानम्)

i  (क) सुभाषचन्द्रबोसः

ii  (ख) राज्ञी लक्ष्मीबाई

iii  (ग) लोकमान्यः बालगङ्गाधरतिलकः

iv  (घ) भगतसिंहः

v  (ङ) चन्द्रशेखरः आजादः

### 3. पट्टिकातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु । (व्याकरणप्रयोगः)

| पट्टिका | अहम्, आवाम्, वयम्, न/च, देहि |
|---|---|

(i) 'धनकामना सुखवासना न च वञ्चना हृदये' अत्र किम् अव्ययपदम् अस्ति ? ______

(ii) "______ , ______, वयम्"- रिक्तस्थाने शब्दरूपाणि पूरयन्तु ?


(iii) 'शूराः वयं धीराः वयम्' अत्र सर्वनामपदं किम् अस्ति ? ______

(iv) "जयमङ्गलं परमोज्ज्वलं नो ______ परमात्मन् ।" रिक्तस्थानं पूरयन्तु ।

### 4. 'क' स्तम्भस्य पदानां 'ख ' स्तम्भस्य अर्थैः सह मेलनं कुर्वन्तु । (अन्वेषणं भाषाविस्तरः च)

| | (क) | | (ख) |
|---|---|---|---|
| (i) | जयगामिनः | (क) | लोभरहिताः |
| (ii) | गतलालसाः | (ख) | साहसयुक्ताः |
| (iii) | प्रियसाहसाः | (ग) | विजेतारः |
| (iv) | वञ्चना | (घ) | कपटभावना |

**5. पट्टिकात: समुचितपदानि चित्वा कोष्ठकानि पूरयन्तु । (तार्किकचिन्तनम्)**




| | |
|---|---|
| **पट्टिका** | धनकामना, अतिनिश्चलता, वञ्चना, सुखवासना, ऊर्ज:, असत्यता |

**6. राष्ट्रिय-चिह्नानि तेषां चित्रै: सह मेलयन्तु । (अन्वेषणं सम्बन्धज्ञानं च)**

| | | | | |
|---|---|---|---|---|
| (i) |  | कमलम् | (क) | राष्ट्रिय-पशु: |
| (ii) |  | सिंह: | (ख) | राष्ट्रिय-ध्वज: |
| (iii) |  | त्रिवर्ण: ध्वज: | (ग) | राष्ट्रिय-क्रीडा |
| (iv) |  | हॉकी-क्रीडा | (घ) | राष्ट्रिय-पुष्पम् |

7. चित्रानुसारं पट्टिकातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु । (अवबोधः)

i  ......................

iv  ......................

ii  ......................

v  ......................

iii  ......................

| पट्टिका | जनसेवकः, अतिभावुकः, शुभचिन्तकः, प्रियसाहसः, दृढ़मानसः |
|---|---|

**इदमपि ज्ञातव्यम्**

**वृक्षाणां नामानि**

| संस्कृतम् | हिन्दी | संस्कृतम् | हिन्दी |
|---|---|---|---|
| जम्बूः | जामुन | पेरुकः | अमरूद |
| नारिकेलः | नारियल | शाल्मलिः | सेमल |
| निम्बः | नीम | कदम्बः | कदम्ब |
| वटः | वटवृक्ष | अशोकः | अशोक |
| करीरः | बबूल | पनसः | कटहल |



## सप्तमः पाठः
# सः एव महान् चित्रकारः

**1. प्रदत्ते चित्रे के वर्णाः दृश्यन्ते? रिक्तस्थानेषु संस्कृतेन लिखन्तु ।** (अवबोधः)

1. ............................
2. ............................
3. ............................
4. ............................
5. ............................



**2. खगान् वर्णैः सह मेलयन्तु ।** (अन्वेषणं तुलना च)

| **खगाः** | **वर्णानि** |
|---|---|
| शुकः | नीलः |
| बकः | हरितः |
| काकः | श्वेतः |
| मयूरः | कृष्णः |

**3. शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य च समक्षं 'न' इति लिखन्तु ।** (अवबोधः)

i) महिषस्य वर्णः कृष्णः भवति । [ ]

ii) पिकस्य वर्णः श्वेतः भवति । [ ]

iii) पाटलस्य वर्णः कृष्णः भवति । [ ]

iv) आकाशस्य वर्णः नीलः भवति । [ ]

v) बकस्य वर्णः रक्तः भवति । [ ]

**4. इन्द्रधनुषि स्थितवर्णान् क्रमानुसारं पट्टिकातः पदानि चित्वा लिखन्तु ।** (अभिज्ञानम् अन्वेषणं च)

| **पट्टिका** | कृष्णः, श्वेतः, हरितः, रक्तः, नीलः, |
|---|---|

वर्णाः-

1. ________ 5. ________
2. ________ 6. ________
3. ________ 7. ________
4. ________



**6. निर्देशानुसारं सर्वनामपदं लिखन्तु । (व्याकरणप्रयोगः लेखनम् च)**


| | (सर्वनामपदम्) |
|---|---|
| यथा - काकः वदति ? | सः वदति । |
| पिकः कूजति । | ________ कूजति । |
| गजः चलति । | ________ चलति । |
| हंसः खादति । | ________ खादति । |
| मयूरः नृत्यति । | ________ नृत्यति । |

**7. निम्नलिखितपदानां कृते पट्टिकातःचित्वा संस्कृतपदं लिखन्तु । (अन्वेषणं लेखनं च)**

पत्ते - ________ पक्षी - ________
कौआ - ________ चोंच - ________
गुलाब - ________

| पट्टिका | खगः, काकः, पर्णानि, पाटलपुष्पम्, चञ्चुः |
|---|---|

**8. अधः स्थितानि चित्राणि वर्णैः पूरयन्तु । (अभिज्ञानम् रचनाकौशलं च)**

|  |  |  |  |  |
|---|---|---|---|---|
